# अकथितञ्च (१।४।५१)


- अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।
- 'दुह्याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रु-शासु-जि-मथ्-मुषाम्।

  कर्मयुक् स्यादकथितं तथा स्यान्नी-हृ-कृष्-वहाम्।।'


गां दोग्धि पयः। बलिं याचते वसुधाम्। तण्डुलान् ओदनं पचति। गर्गान् शतं दण्डयति। व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रुते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति,हरति,कर्षति,वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि।।

गोः दोग्धि पयः

गां दोग्धि पयः




वलेः याचते वसुधाम्        वलिं याचते वसुधाम्




तण्डुलैः ओदनं पचति तण्डुलान् ओदनं पचति






गर्गेभ्यः शतं दण्डयति गर्गान् शतं दण्डयति




व्रजे अवरुणाद्धि गाम्

व्रजम् अवरुणाद्धि गाम्




माणवकात् पन्थानं पृच्छति

माणवकं पन्थानं पृच्छति



वृक्षात् अवचिनोति फलानि        वृक्षम् अवचिनोति फलानि




माणवकाय धर्मं ब्रुते शास्ति वा

माणवकं धर्मं ब्रुते शास्ति वा



शतं जयति देवदत्तात्

शतं जयति देवदत्तम्




सुधां क्षीरनिधेः मथ्नाति

सुधां क्षीरनिधिं मथ्नाति




देवदत्तात् शतं मुष्णाति

देवदत्तं शतं मुष्णाति



ग्रामे अजां नयति हरति कर्षति वहति वा

ग्रामम् अजां नयति हरति कर्षति वहति वा




# अर्थनिबन्धनेयं संज्ञा ।

- तदर्थक-अन्यधातूनां योगेऽपि इयं संज्ञा भवेत् इति ।
- यथा – **भिक्ष्, नाथ्** **याच्**

**भाष्, वच्** **ब्रु**

# बलिं भिक्षते वसुधाम्



माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि ।



समाप्तः